॥ श्रीजिनाय नमः ॥

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ श्रीमित्रत्रय चरित्रं ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित भाषांतर करनार तथा छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज.

( आ ग्रंथना अन्वय तथा भाषांतरना प्रसिद्ध कर्ताए सर्व हक स्वाधिन राख्या छे )

विक्रम संवत् १९८४ किमत रु. १-८-० सने १९२८

॥ श्रीजिनाय नमः ॥

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ अथ श्रीमित्रत्रय चरित्रं प्रारभ्यते ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय तथा गुजराती भाषांतर कर्ता—पंडित श्रावक हीरालाल हंसराज—जामनगरवाळा

इहार्थे शृणु दृष्टान्तमस्ति विस्तीर्णवैभवम् । भूर्भुवःस्वस्त्रयीख्यातं दूरपाराभिधं पुरम् ॥ १ ॥

अन्वयः–इह अर्थे दृष्टांतं शृणु ? विस्तीर्ण वैभवं, भूः भुवः स्वः त्रयी ख्यातं दूरपार अभिधं पुरं अस्ति. ॥ १ ॥

अर्थः—( वळी हे राजन् ! ) आ संबंधी तमो दृष्टांत सांभळो ? विशाल समृद्धिवाळुं, तथा पृथ्वी, पाताल अने स्वर्ग, ए त्रणेमां प्रख्याति पामेलुं "दूरपार" नामनुं नगर छे. ॥ १ ॥

यस्य भूमिगृहाण्याहुरधोलोकं विचक्षणाः । उच्चैःशिरोगृहाण्यूर्ध्वलोकमालोकशालिनः ॥ २ ॥

अन्वयः–आलोक शालिनः विचक्षणाः यस्य भूमि गृहाणि अधोलोकं, उच्चैः शिरोगृहाणि ऊर्ध्वलोकं आहुः. ॥ २ ॥

अर्थः–ज्ञानवडे शोभता विचक्षणो जे नगरनां भोंयरांओने "अधोलोक" तथा उपरनां घरोने "ऊर्ध्वलोक" कहे छे. ॥ २ ॥

महारम्भवशीभूतसुरासुरनरोरगः । उग्रशासन इत्येतत्पुरं पाति जनाधिपः ॥ ३ ॥

अन्वयः–महारंभ वशीभूत सुर असुर नर उरगः उग्रशासनः इति जनाधिपः एतत् पुरं पाति. ॥ ३ ॥

अर्थः—महोटा समारंभथी वश थयेल छे, देवो, दानवो, मनुष्यो तथा भुवनपतिओ जेने एवो " उग्रशासन" नामनो राजा ते नगरनुं रक्षण करे छे. ॥ ३ ॥

दत्तमुच्चैःपदं येन तुष्टेनेव सुपर्वणाम् । अर्पितं कुपितेनेव द्विजिह्वानामधःपदम् ॥ ४ ॥

अन्वयः–तुष्टेन इव येन सुपर्वणां उच्चै पदं दत्तं, कुपितेन इव द्विजिह्वानां अध.पदं अर्पितं. ॥ ४ ॥

अर्थः—जाणे खुशी थयो होय नही ! तेम ते राजाए देवोने उंचुं स्थान आपेलुं छे, अने क्रोधित थयेलानीपेठे नागोने तेणे नीचुं स्थान आप्युं छे. ॥ ४ ॥

बभूव सचिवः शुद्धबुद्धिरित्यस्य विश्रुतः । अशेषतत्पुरोदारसर्वव्यापारपारगः ॥ ५ ॥

अन्वयः—अशेष तत्पुर उदार सर्व व्यापार पारगः " शुद्धबुद्धिः " इति विश्रुतः अस्य सचिवः बभूव. ॥ ५ ॥

अर्थः—तेनां सर्व नगरोनां सघळां विशाळ कार्योमां पारंगामी, एवो " शुद्ध बुद्धि " नामथी प्रख्यात थयेलोतेनो मंत्री हतो॥ ५ ॥

**प्रभोरादेशतो नित्यं पुरेऽस्मिंश्चरतश्चिरात् । पुरुषाश्रय इत्यस्य मिलितः सुहृदन्यदा ॥ ६ ॥**

अन्वयः—प्रभोः आदेशतः नित्यं अस्मिन् पुरे चरतः चिरात् अन्यदा " पुरुषाश्रयः " इति सुहृद् अस्य मिलितः ॥ ६ ॥

अर्थः—स्वामीना हुकमथी हमेशां ते नगरमां फरतां थकां घणे काळे एक दिवसे " पुरुषाश्रय " नामनो मित्र तेने मळ्यो ॥ ६ ॥

**स कोऽपि परमस्थेमा प्रेमास्मिन्नस्य विद्यते । बभूव भोजने येन भाजनस्यापि नान्तरम् ॥ ७ ॥**

अन्वयः—अस्मिन् अस्य परमस्थेमा सः कः अपि प्रेमा विद्यते, येन भोजने भाजनस्य अपि अंतरं न बभूव ॥ ७ ॥

अर्थः—ते मित्रमां तेनो घणीज स्थिरतावाळो ते कोइक एवो तो प्रेम जाम्यो, के जेथी भोजन समये भाजननो पण ( तेओ वच्चे ) अंतर रह्यो नही ॥ ७ ॥

**प्रीतिं बभार तेनैव स्नातेनालंकृतेन सः । न कदापि स्वयं स्नातो नालंकारं चकार वा ॥ ८ ॥**

अन्वयः—तेन एव स्नातेन अलंकृतेन सः प्रीतिं बभार, स्वयं कदापि न स्नातः, वा न अलंचकार ॥ ८ ॥

अर्थः—ते मित्रनेज न्हवरावीने, तथा आभूषणो पेहेरावीने ते खुशी थतो हतो, परंतु पोते कोइ पण दिवसे न्हातो नही, तेम आभूषणो पण पहेरतो नही ॥ ८ ॥

**स्वयं कुसुमकर्पूरकस्तूरीचन्दनादिभिः । अमुं स वासयामास न चक्रे वासमात्मनः ॥ ९ ॥**

अन्वयः—सः स्वयं अमुं कुसुम कर्पूर कस्तूरी चंदन आदिभिः वासयामास, आत्मनः वासं न चक्रे. ॥ ९ ॥

अर्थः—ते पोते ते मित्रने पुष्पो, कपूर, कस्तूरी, तथा चंदन आदिकवडे सुगंधी करतो हतो, परंतु पोताने सुगंधि करतो न्होतो.

**दुःखितो दुःखितस्यास्य स्पृहां पूरयितुं सदा । सोऽभ्रमद् भुवने बाढं मूढः स्वार्थनिरुद्यमः ॥ १० ॥**

अन्वयः—सः मूढः स्वार्थ निरुद्यमः दुःखितः दुःखितस्य अस्य स्पृहां पूरयितुं सदा बाढं भुवने अभ्रमत्. ॥ १० ॥

अर्थः—ते मूर्ख स्वार्थमां आळसु थयोथको कष्ट वेठीने ( पण ) दुःख पामता एवा ते मित्रनी वांछा पूरवाने हमेशां विश्रामरहित जगतमां भमतो हतो. ॥ १० ॥

**वयस्योऽपि समं शेते समं जागर्ति तेन सः । समं याति समं तिष्ठत्याधिक्यं प्रेम्णि दर्शयन् ॥ ११ ॥**

अन्वयः—सः वयस्यः अपि प्रेम्णि आधिक्यं दर्शयन् तेन समं शेते, समं जागर्ति, समं याति, समं तिष्ठति. ॥ ११ ॥

अर्थः—ते मित्र पण प्रेममां अधिकपणुं देखाडतोथको तेनीसाथेज शयन करे, साथेज जागे, साथेज चाले, अने साथेज उभे छे.

**इति तस्य महोद्दामप्रेमप्रसरपेशलम् । नित्यासक्ततया नित्यमित्रमित्यमुमभ्यधुः ॥ १२ ॥**

अन्वयः—इति तस्य नित्य आसक्ततया महा उद्दाम प्रेम प्रसर पेशलं अमुं "नित्यमित्रं" इति अभ्यधुः. ॥ १२ ॥

अर्थः—एरीते तेना हमेशना आसक्तपणाथी अति प्रेमना प्रवाहथी आनंदित थयेला एवा तेने ( लोको ) "नित्यमित्र" नामथी

बोलावता हता. ॥ १२ ॥

**किं चैष पितृपूज्योऽयमिति दाक्षिण्यतः श्रुतिम् । दत्ते विश्वहिताख्यस्य पुंसो वाचि कदाचन ॥ १३ ॥**

अन्वयः-किंच एषः पितृपूज्यः, इति दाक्षिण्यतः कदाचन अयं "विश्वहित" आख्यस्य पुंसः वाचि श्रुतं दत्ते. ॥ १३ ॥

अर्थः-वळी आ (मारा) कुलगुरु छे, एवी दाक्षिणताथी कोइक दिवसे ते शुद्धबुद्धि "विश्वहित" नामना पुरुषनुं वचन सांभळेछे.

**अयमुल्लासमत्तो मां मन्यतेऽथ न मन्यते । इति द्विधामना विश्वहितः प्राह कदापि तम् ॥ १४ ॥**

अन्वयः-उल्लास मत्तः अयं मां मन्यते, अथ न मन्यते, इति द्विधामनाः विश्वहितः कदापि तं प्राह. ॥ १४ ॥

अर्थः—विलासमां उन्मत्त थयेलो आ शुद्धबुद्धि मारुं माने अथवा न (पण) माने, एम उच्चकमनवाळा ते विश्वहिते एकदिवसे तेने कह्युं के, ॥ १४ ॥

**उदारस्फाररूपश्रीर्महाकुलसमुद्भवः । सुहृत्तवैष नो कस्य प्रयाति स्पृहणीयताम् ॥ १५ ॥**

अन्वयः-उदार स्फार रूपश्रीः, महाकुल समुद्भवः एषः तव सुहृत् कस्य स्पृहणीयतां न याति ? ॥ १५ ॥

अर्थः—मनोहर विस्तीर्ण रूपनी शोभावाळो, तथा महान् कुलमां उत्पन्न थयेलो आ तारो मित्र कोने आनंद उपजावतो नथी !

**किं तु त्वमनुरक्तोऽसि यथास्मिन्न तथा त्वयि । अयमन्तःकुशुद्धत्वाद्धारयत्यनुरागिताम् ॥ १६ ॥**

अन्वयः—किंतु यथा त्वं अस्मिन् अनुरक्तः असि, तथा अयं अंतः कुशुद्धत्वात् त्वयि अनुरागितां न धारयति, ॥ १६ ॥

अर्थः—परंतु जेम तुं तेनामां आसक्त छो, तेम आ (तारो मित्र) मनमां मेलो होवाथी ताराप्रते अनुरागिपणुं धारण करतो नथी.

**यतः स्नानेन भोज्येनालंक्रियेत यदैव न । कदाप्यसत्कृत इव स्याद्विरूपस्तदैव सः ॥ १७ ॥**

अन्वयः—यतः कदापि यदा एव स्नानेन, भोज्येन सः न अलंक्रियेत, तदैव असत्कृतः इव विरूपः स्यात्, ॥ १७ ॥

अर्थः—केमके कोइक दिवसे ज्यारे स्नान, भोजन, तथा आभूषणोवडे तेनो सत्कार करवामां नही आवे, तेज वखते ते तिरस्कार पामेलानीपेठे विकृतिवाळो थइ जशे. ॥ १७ ॥

**तद्यावद्दैवतो न स्याद्वैचित्यममुना सह । दुःखेऽप्याश्वासकस्तावत्कर्तुं कोऽप्युचितः सुहृत् ॥ १८ ॥**

अन्वयः—तत् दैवतः यावत् अमुना सह वैचित्यं न स्यात्, तावत् दुःखे अपि आश्वासकः कः अपि सुहृत् कर्तुं उचितः ॥१८॥

अर्थः—माटे दैवयोगे ज्यां सुधीमां ते मित्र साथे वैमनस्य न थाय, त्यां सुधीमां दुःखमां पण आश्वासन आपनारो कोइक मित्र (तारे) करवो उचित छे. ॥ १८ ॥

**यदा विघटसे दैवात्सहानेन तदा तव । नान्यो भावी सुहृल्लोकैर्दूरस्थैस्तु हसिष्यसे ॥ १९ ॥**

अन्वयः–दैवात् यदा अनेन सह विघटसे, तदा तव अन्यः सुहृद् न भावी, लोकैः तु दूरस्थैः हसिष्यसे. ॥ १९ ॥
अर्थः–(केमके) दैवयोगे ज्यारे आ मित्रनी साथे तारो अणबनाव थशे, त्यारे तारो बीजो कोइ मित्र थशे नही, अने लोको तो दूर रहीने तारी हांसी कर्या करशे. ॥ १९ ॥

**एकं नेत्रमनेत्रेषु सूनुमेकमसूनुषु । एकं मित्रममित्रेषु जगुर्मित्राणि तत्कुरु ॥ २० ॥**

अन्वयः—एकं नेत्रं अनेत्रेषु, एकं सूनुं असूनुषु, एकं मित्रं अमित्रेषु जगुः, तत् मित्राणि कुरु ? ॥ २० ॥
अर्थः–(वळी) एक चक्षु अचक्षुमां, एक पुत्र अपुत्रोमां, अने एक मित्र अमित्रोमां लेखाय छे, माटे (वधारे) मित्रो कर ? ॥२०॥

**इति विश्वहितोक्त्यासौ किंचिदञ्चितचेतनः । चक्रे मित्रं कृतज्ञाख्यमपरं शिथिलादरः ॥ २१ ॥**

अन्वयः—इति विश्वहित उक्त्या किंचित् अंचित चेतनः असौ शिथिल आदरः "कृतज्ञाख्यं" अपरं मित्रं चक्रे. ॥ २१ ॥
अर्थः–ए रीतनां विश्वहितनां वचनथी कंइक भान आवतां तेणे मंद आदरमानपूर्वक "कृतज्ञ" नामनो बीजो मित्र कर्यो. ॥२१॥

**तमन्नवस्त्रालंकारगन्धताम्बूलमण्डलैः । सोऽप्रीणयत्कृतज्ञाख्यं मित्रं पर्वणि पर्वणि ॥ २२ ॥**

अन्वयः—सः तं कृतज्ञाख्यं मित्रं पर्वणि पर्वणि अन्न वस्त्र अलंकार गंध तांबूल मंडलैः अप्रीणयत्. ॥ २२ ॥
अर्थः—(पछी) ते ते कृतज्ञनामना मित्रने पर्वे पर्वे भोजन, वस्त्र, आभूषण, सुगंधि पदार्थो, तथा तांबूलना समूहोवडे खुशी

करवा लाग्यो, ॥ २२ ॥

**पूज्यमानं समालोक्य तेन सर्वेषु पर्वसु । समाचचक्षिरे पर्ववयस्य इति तं जनाः ॥ २३ ॥**

अन्वयः–तेन सर्वेषु पर्वेषु पूज्यमानं तं समालोक्य जनाः "पर्ववयस्यः" इति समाचचक्षिरे. ॥ २३ ॥

अर्थः–तेनावडे सर्व पर्वोमां पूजाता एवा तेने जोइने लोको (तेने) "पर्वमित्र" एवा नामथी बोलाववा लाग्या. ॥ २३ ॥

**ईदृग्विधसुहृद्द्वन्द्वनिबिडद्वन्द्वपातिनम् । स विश्वमहिता विश्वहितोऽमुं पुनरभ्यधात् ॥ २४ ॥**

अन्वयः–ईदृग्विध सुहृद् द्वंद्व निबिड द्वंद्व पातिनं अमुं विश्वमहिता सः विश्वहितः पुनः अभ्यधात्. ॥ २४ ॥

अर्थः–एवी रीतना बन्ने मित्रोनी गाढ मित्राचारीमां पडेला एवा ते शुद्धबुद्धिने जगतमां पूजनीक एवा ते विश्वहिते फरीने कह्युं के,

**त्वद्दुःखे दुःखितो भावी सैष पर्वसुहृत्क्षणम् । भव्योऽयमपि किं त्वीदृग्मित्रार्थं न दिशाम्यहम् ॥ २५ ॥**

अन्वयः—सः एषः पर्वसुहृत् त्वद्दुःखे क्षणं दुःखितः भावी, अयं अपि भव्यः, किंतु अहं ईदृग्मित्रार्थं न दिशामि. ॥ २५ ॥

अर्थः—ते आ पर्वमित्र तारा दुःखवखते थोडीवार दुःखी थशे, माटे ते पण ठीक छे. परंतु में (तने) आवा मित्रमाटे इसारो न्होतो कर्यो. ॥ २५ ॥

यः स्यादल्पेन संतुष्टो नत्या वा स्तवनेन वा । दुःखेभ्यः क्षम उद्धर्तुं स कोऽपि क्रियतां सुहृत् ॥ २६ ॥

अन्वयः—यः नत्या वा स्तवनेन, वा अल्पेन संतुष्टः स्यात्, दुःखेभ्यः उद्धर्तुं क्षमः, सः कः अपि सुहृत् क्रियतां ? ॥ २६ ॥

अर्थः—जे नमस्कारथी अथवा स्तुतिथी, एम स्वल्प कार्यथीज संतुष्ट थाय, तथा दुःखमांथी छोडाववाने समर्थ होय, एवो कोइक मित्र तुं कर ? ॥ २६ ॥

विहस्य शिरसि न्यस्य शुद्धबुद्धिः करौ ततः । क्वेदृग्मया सुहृल्लभ्योऽपृच्छद्विश्वहितादिति ॥ २७ ॥

अन्वयः—ततः शुद्धबुद्धिः विहस्य शिरसि करौ न्यस्य, ईदृग् सुहृद् मया क्व लभ्यः, इति विश्वहितात् अपृच्छत्. ॥ २७ ॥

अर्थः—पछी ते शुद्ध बुद्धिए हसीने, तथा मस्तके हाथ जोडीने, आवो मित्र मने क्यां मळे ? एम विश्वहितने पूछ्युं. ॥ ४ ॥

अथैष श्रवणानन्दप्रवणामन्दवाग्भरः । शुद्धबुद्धेः पुरो विश्वहितं विश्वहितो जगौ ॥ ५ ॥

अन्वयः—अथ श्रवण आनंद प्रवण अमंद वाग्भरः एषः विश्वहितः शुद्धबुद्धेः पुरः विश्वहितं जगौ. ॥ ५ ॥

अर्थः—पछी कर्णोने आनंद आपवामां समर्थ अने विशालवाणीना समूहवाळा एवा ते विश्वहिते शुद्धबुद्धिनी आगल जगतने हितकारी वचन कह्युं के, ॥ ५ ॥

**विभावरीविभुविभासंनिभामलकुन्तलम् । रङ्गद्गङ्गातरङ्गायमानश्रीवरचीवरम् ॥ ६ ॥**
**मुक्ताचन्दनकर्पूरपूरगौरतरद्युतिम् । तारकोटीरताडङ्कहारकेयूरकङ्कणम् ॥ ७ ॥**
**आनाभिकूर्चमुत्तुङ्गविस्तीर्णाङ्गं सदास्मितम् । दृशा प्रसन्नया पुंसः पश्यन्तं नमतोऽग्रतः ॥ ८ ॥**
**मध्येपुरं परिभ्राम्यञ्शुद्धबुद्धे कदाचन । पुमांसं मांसलश्रीकमीदृशं क्वापि पश्यसि ॥९॥चतुर्भिः कला.**

अन्वयः—विभावरी विभु विभा संनिभ अमल कुंतलं, रंगत् गंगा तरंगायमान श्री वर चीवरं, ॥ ६ ॥ मुक्ता चंदन कर्पूर पूर गौरतर द्युतिं, तार कोटीर ताडंक हार केयूर कंकणं, ॥ ७ ॥ आनाभि कूर्चं, उत्तुंग विस्तीर्ण अंगं, सदास्मितं, अग्रतः नमतः पुंसः प्रसन्नया दृशा पश्यंतं, ॥ ८ ॥ मांसलश्रीकं, ईदृशं पुमांसं, (हे) शुद्धबुद्धे ! मध्येपुरं परिभ्राम्यन् कदाचन क्व अपि पश्यसि.

अर्थः—चंद्रनी कांतिसरखा निर्मल (श्वेत) केशोवाळा, गंगाना उछळतां मोजांसरखा शोभनिक उत्तम (श्वेत) वस्त्रोवाळा, ॥ ६ ॥ मोती, चंदन, तथा कपूरना समूहसरखी अति श्वेत कांतिवाळा, मनोहर मुकुट, कुंडल, हार, बाजुबंध तथा कंकणना (अलंकारोवाळा,) ॥ ७ ॥ छेक नाभिपर्यंत (लटकता) दाढीना केशोवाळा, उंचां विशाल शरीरवाळा, हमेशां हसमुखा, आगळ ( आवीने ) नमता पुरुषोने प्रेमभरी दृष्टिथी जोता, ॥ ८ ॥ तथा महान समृद्धिवाळा, एवा पुरुषने, हे शुद्धबुद्धि ! (तुं) नगरनी अंदर भ्रमण

करतोथको कोइक वखते क्यांक पण जोइ शकीश. ॥ ९ ॥ चतुर्भिःकलापकं ॥

**अथ सोऽभिदधे तात कदापि जिनसद्मनि । कदापि मुनिशालायां कदापि सदने सताम् ॥ १० ॥**

**कदापि राजमार्गान्तः संचरन्तं नरोत्तमम् । संचरन्पथि पश्यामि सेव्यमानं वरैर्नरैः ॥ ११ ॥ युग्मम् ॥**

अन्वयः—अथ सः अभिदधे, (हे) तात ! कदापि जिन सद्मनि, कदापि मुनिशालायां, कदापि सतां सदने, ॥ १० ॥ कदापि राजमार्गांतः संचरंतं, वरैः नैरः सेव्यमानं नरोत्तमं पथि संचरन् पश्यामि. ॥ ११ ॥ युग्मं ॥

अर्थः—पछी ते शुद्धबुद्धिए कह्यु के, हे तात ! कोइक दिवस जिनमंदिरमां, कोइक दिवस मुनिओना उपाश्रयमां, कोइक दिवस सज्जनोने घेर, ॥ १० ॥ तथा कोइक दिवस राजमार्गमां चालता, अने उत्तम पुरुषोथी सेवता, एवा ते उत्तम पुरुषने मार्गे चालतो हुं जोउं छुं. ॥ ११ ॥ युग्मं ॥

**इत्याकर्ण्य जगौ विश्वहितस्तत्तं सुहृत्कुरु । अङ्ग तत्संगमाधाने दुःखं न स्यात्कुतोऽपि ते ॥ १२ ॥**

अन्वयः—इति आकर्ण्य विश्वहितः जगौ, तत् तं सुहृत् कुरु ? तत्संगम आधाने अंग ते कुतः अपि दुःखं न स्यात्. ॥ १२ ॥

अर्थः—ते सांभळीने ते विश्वहिते कह्युं, ते माटे तेने तुं मित्र कर? तेनी मित्राइ करवाथी खरेखर तने क्यांयथी पण दुःख

थशे नही. ॥ १२ ॥

**स हि सिद्धः पुमाँल्लोकनाथाख्यः सर्वगो महान्। आश्रितं पाति भूपाग्निकूपसर्पाद्यपायतः ॥ १३ ॥**

अन्वयः–हि सः सर्वगः महान् लोकनाथाख्यः सिद्धः पुमान् आश्रितं भूप अग्नि कूप सर्प आदि अपायतः पाति. ॥ १३ ॥

अर्थः—खरेखर ते सर्वज्ञ अने महान् लोकनाथ नामना सिद्ध पुरुष छे, अने ते ( पोताना ) आश्रितनुं राजा अग्नि, कुवा, तथा सर्प आदिकना उपद्रवथी रक्षण करे छे. ॥ १३ ॥

**इत्यस्य शिक्षया सख्यं तेन साकं चिकीर्षति। प्रमादाद्विस्मरत्येव शुद्धबुद्धिर्दिने दीने ॥ १४ ॥**

अन्वयः–इति अस्य शिक्षया शुद्धबुद्धिः तेन साकं सख्यं चिकीर्षति, दिने दिने प्रमादात् विस्मरति एव, ॥ १४ ॥

अर्थः–एवी रीतनी तेनी शिखामणथी ते शुद्धबुद्धि तेनी साथे मित्राइ करवानी इच्छा तो करे छे, परंतु रोजेरोज आळसने लीधे ते विसरी जाय छे. ॥ १४ ॥

**अभियोगे ततो विश्वहितेन विहिते मुहुः। तं ननामैकदा लोकनाथं यानस्थ एव सः ॥ १५ ॥**

अन्वयः—ततः विश्वहितेन मुहुः अभियोगे विहिते, एकदा यानस्थः एव सः तं लोकनाथं ननाम. ॥ १५ ॥

अर्थः—पछी ते विश्वहिते वारंवार उश्केर्याथी एक दिवसे वाहनमां बेठांबेठांज तेणे ते लोकनाथने वंदन कर्युं. ॥ ३५ ॥

**कदापि कार्यतो गच्छन्दूरे दृष्टस्य वर्त्मनि । तस्य प्रणामसंदेशं प्रेषयामास पार्श्वगैः ॥ ३६ ॥**

अन्वयः—कदापि कार्यतः गच्छन् वर्त्मनि दूरे दृष्टस्य तस्य पार्श्वगैः प्रणाम संदेशं प्रेषयामास. ॥ ३६ ॥

अर्थः—(वळी) एक दिवसे कार्य प्रसंगे (बहार) जतां, मार्गमां दूरथी देखायेला एवा ते लोकनाथने (तेणे) पासे उभेला (नोकरोमारफते) प्रणामनो संदेशो मोकलाव्यो. ॥ ३६ ॥

**फलपुष्पादिकं चारु केनचिद्ढौकनीकृतम् । यस्य कस्यापि हस्तेन तस्मै प्रैषोत्कदापि सः ॥ ३७ ॥**

अन्वयः—कदापि सः केनचित् ढौकनीकृतं चारु फल पुष्पादिकं यस्य कस्य अपि हस्तेन तस्मै प्रैषीत्. ॥ ३७ ॥

अर्थः—( वळी ) एक दिवसे तेणे, कोइए भेट आपेलां मनोहर फल पुष्पआदिक, कोइक माणसनी मारफते ते लोकनाथने मोकलाव्यां. ॥ ३७ ॥

**दूरस्थोऽपि स्वयं गत्वा युग्यादुत्तीर्य नम्यते । स महात्मा स्वयं चास्मै ढौक्यं पुष्पफलादिकम् ॥३८॥**
**इत्थमाराध्यमानोऽयमतिदाक्षिण्यपूरितः । दक्ष रक्षिष्यति स्पष्टं भवत्कष्टं कुतोऽपि ते ॥ ३९ ॥**
**एवं पुनरसौ विश्वहितेनाभिहितो मुदा । यानादुत्तीर्य तं पुष्पफलैरर्चति वन्दते ॥४०॥त्रिभिर्विशेषकम्॥**

अन्वयः—दूरस्थः अपि सः महात्मा युग्यात् उत्तीर्य स्वयं गत्वा नम्यते, च पुष्प फल आदिकं अस्मै स्वयं ढौक्यं. ॥ ३८ ॥ (हे) दक्ष ! इत्थं आराध्यमानः अयं अति दाक्षिण्य पूरितः कुतः अपि ते भवत् कष्टं स्पष्टं रक्षिष्यति, ॥ ३९ ॥ एवं पुनः विश्व हितेन अभिहितः असौ मुदा यानात् उत्तीर्य तं पुष्प फलैः अर्चति वंदते. ॥ ४० ॥ त्रिभिर्विशेषकं ॥

अर्थः—दूर रहेला एवा पण ते महात्माने, वाहनपरथी नीचे उतरी पोते जइ वांदवा, तथा पुष्पो अने फलोआदिक तेमने पोताने हाथेज भेट धरवां, ॥ ३८ ॥ हे चतुर शुद्धबुद्धि ! एरीते आराधेला ते लोकनाथ अत्यंत दाक्षिणता धारण करीने, क्यांयथी पण तने आवी पडता दुःखनुं निवारण करशे, ॥ ३९ ॥ एरीते वळी ते विश्वहिते कहेवाथी ते शुद्धबुद्धि हर्षथी वाहनपरथी उतरीने तेमने पुष्पो तथा फलोवडे पूजे छे, तथा वंदन करे छे. ॥ ४० ॥ त्रिभिर्विशेषकं ॥

**अयमालोकितं मार्गे नियमेन नमत्यमुम् । इति प्रणामसुहृदं जगदुस्तस्य तं जनाः ॥ ४१ ॥**

अन्वयः—मार्गे आलोकितं अमुं अयं नियमेन नमति, इति जनाः तं तस्य प्रणाम सुहृदं जगदुः. ॥ ४१ ॥

अर्थः—मार्गमां नजरे पडता एवा ते लोकनाथने ते शुद्धबुध्धि नियमबंध वांदे छे, एवा हेतुथी लोको तेने तेनो " प्रणाममित्र " कहेवा लाग्या. ॥ ४१ ॥

**इति मित्रत्रयीमेनामेष संतोषयन्सदा । उग्रशासनभूपस्य शासने सुचिरं स्थितः ॥ ४२ ॥**

अन्वयः—इति एनां मित्रत्रयीं सदा संतोषयन् एषः उग्र शासन भूपस्य शासने सुचिरं स्थितः. ॥ ४२ ॥

अर्थः—एरीते ते त्रणे मित्रोने हमेशां संतोषतो ते शुद्धबुद्धि उग्रशासन राजाना राज्यमां घणा समयसुधी रह्यो. ॥ ४२ ॥

**एकदा नित्यमित्रेण सहैकशयने स्थितः । सुखं स एष सुष्वाप भूरिभोगविभूषणः ॥ ४३ ॥**

अन्वयः—एकदा नित्यमित्रेण सह एक शयने स्थितः सः एषः भूरि भोग विभूषणः सुखं सुष्वाप. ॥ ४३ ॥

अर्थ—( पछी ) एक दिवसे ते नित्यमित्रनी साथे एक बिछानामां रहीने ते आ शुद्धबुद्धि घणा भोगोथी विभूषित थइने सुखेथी सूतो. ॥ ४३ ॥

**यावन्निद्रां मुमोचायं तावत्पार्श्वेष्वलोकत । श्यामाञ्शोणदृशः क्रूरान्नरानुद्गर्वमुद्गरान् ॥ ४४ ॥**

अन्वयः—यावत् अयं निद्रां मुमोच, तावत् पार्श्वेषु श्यामान्, शोण दृशः, क्रूरान्, उद्गर्व मुद्गरान् नरान् अलोकत. ॥४४॥

अर्थः—( पछी ) जेवामां तेणे निद्रानो त्याग कर्यो, तेवामां ( पोतानी ) पडखे श्याम शरीरवाळा, लाल आंखोवाळा, भयंकर, अने उगामेला मुद्गरोवाळा पुरुषोने ते जोवा लाग्यो. ॥ ४४ ॥

**क्रुद्धस्य भर्तुरादेशकृतो यूयं किमागताः । मयि केनापराधेन कारितं प्रभुणास्ति किम् ॥ ४५ ॥**

**एवमेतेन ते पृष्टाः प्राहुर्भर्तैव दोषवित् । त्वं तु स्वाम्यादतः कृष्ट्वा क्षेपितोऽस्यद्य कूपके ॥ ४६ ॥**

अन्वयः—क्रुद्धस्य भर्तुः आदेशकृतः यूयं किं आगताः ? केन अपराधेन प्रभुणा मयि किं कारितं अस्ति ? ॥ ४५ ॥ एवं एतेन पृष्टाः ते आहुः, दोषवित् भर्ता एव, त्वं तु अतः स्वाम्यात् कृष्ट्वा अद्य कूपके क्षेपितः असि. ॥ ४६ ॥ युग्मं ॥

अर्थः–क्रोधातुर थयेला एवा ते उग्रशासन राजाना नोकरो, एवा तमो (अहीं) केम आव्या छो ? अने शुं अपराधथी ते राजाए मारेमाटे तमोने शुं फरमाव्युं छे ? ॥ ४५ ॥ एम तेणे पूछवाथी तेओए कह्युं के, तमारा अपराधना संबंधमां तो ते राजाज जाणे छे, परंतु तमोने आ अधिकार उपरथी उतारीने आजे कुवामां फेंकी दीधा छे, ॥ ४६ ॥ युग्मं ॥

**इति तद्वाक्यमाकर्ण्य सोऽयं भयभराकुलः । नित्यमित्रं प्रति प्रोचे गिरा मन्दत्वगुप्तया ॥ ४७ ॥**

अन्वयः—इति तद्वाक्यं आकर्ण्य भय भर आकुलः सः अयं मंदत्व गुप्तया गिरा नित्यमित्रंप्रति प्रोचे. ॥ ४७ ॥

अर्थः—एरीतनुं तेओनुं वचन सांभळीने भयना समूहथी व्यकुल थयेलो ते शुद्धबुद्धि धणीज धीमी अने गुप्त वाणीथी ते नित्य मित्रने कहेवा लाग्यो के, ॥ ४७ ॥

**सखे सखे समुत्तिष्ठ कथंचिदपि रक्ष माम् । उग्रशासनधात्रीशः क्रुद्धवानधुना मयि ॥ ४८ ॥**

अन्वयः–(हे) सखे ! सखे ! समुत्तिष्ठ ? कथंचित् अपि मां रक्ष ? अधुना मयि उग्र शासन धात्रीशः क्रुद्धवान्. ॥ ४८ ॥

अर्थः—हे मित्र ! मित्र ! तुं उभो था ? अने कोइपण रीते मारुं रक्षण कर ? ( केमके ) आ वखते मारापर उग्रशासन राजा क्रोधायमान थयो छे. ॥ ४८ ॥

**कति संपदि मित्राणि न स्युर्लुब्धानि देहिनाम् । दृश्यतेऽपि विपत्तौ यः क्षितिस्तेनैव रत्नसूः ॥ ४९ ॥**

अन्वयः—संपदि देहिनां कति लुब्धानि मित्राणि न स्युः ? यः विपत्तौ अपि दृश्यते, तेन एव क्षितिः रत्नसूः. ॥ ४९ ॥

अर्थः—संपत् वखते प्राणीओने केटला लालचु मित्रो नथी आवी मळता ? परंतु दुःख वखते पण जे आवी मळे छे, तेथीज आ पृथ्वी रत्नने उत्पन्न करनारी कहेवाय छे. ॥ ५२ ॥

**पितृमातृप्रियाभ्रातृपुत्रादिभ्योऽपि वत्सलः । सुहृन्ममासि सन्मित्रं दुःखोद्धाराय धार्यते ॥ ५३ ॥**

अन्वयः-(हे) सुहृत्! (त्वं) मम पितृ मातृ प्रिया भ्रातृ पुत्र आदिभ्यः अपि वत्सलः असि, दुःख उद्धाराय सन्मित्रं धार्यते.

अर्थः—हे मित्र! तुं मने पिता, माता, स्त्री, भाइ, तथा पुत्र आदिकथी पण वहालो छे. वळी (मनुष्यो) दुःखमांथी उगरवामाटे उत्तम मित्रने धारण करे छे. ॥ ५३ ॥

**तदिदानीं ममानेन क्लिश्यमानस्य भूभुजा । अपारदुःखकूपारतारणाय तरीभव ॥ ५४ ॥**

अन्वयः-तत् इदानीं अनेन भूभुजा क्लिश्यमानस्य मम अपार दुःख कूपार तारणाय तरीभव ? ॥ ५४ ॥

अर्थः-माटे आसमये आ उग्रशासन राजाथी पीडा पामता, एवा मने आ अपार कष्टना महासागरमांथी तारवाने (तुं) नावरूप था?

**अथो म्लानाननो नित्यसुहृदित्याह किं नु भोः । नृपं दिशसि मे क्रुद्धं संबन्धः क इवावयोः ॥ ५५ ॥**

अन्वयः-अथो म्लान आननः नित्य सुहृद् इति आह, भोः क्रुद्धं नृपं मे नु किं दिशसि ? आवयोः कः इव संबंधः ! ॥५५॥

अर्थः-त्यारे झंखवाणा मुखवाळो ते नित्यमित्र एम कहेवा लाग्यो के, अरे ! क्रोध पामेला राजाना संबंधमां मने (तुं) शुं कहे छे? आपण बन्ने वच्चे शानो संबंध छे ! ॥ ५५ ॥

**किं नोपलक्षतेऽसौ मामिति भ्रान्त्येव शुद्धधीः । कस्ते चित्तभ्रमः किं मां न जानासीति तं जगौ ५६**

अन्वयः—मां असौ किं न उपलक्षते ? इति भ्रांत्या इव शुद्धधीः तं इति जगौ, ते कः चित्तभ्रमः ! किं मां न जानासि ? ५६

अर्थः—मने आ शुं नथी ओळखतो ? जाणे एवी भ्रमणाथी होय नही ! तेम (ते) शुद्धबुद्धिए तेने एम कह्युं के, तने आ चित्तभ्रम शुं थयो ? शुं (तुं) मने नथी ओळखतो ? ॥ ५६ ॥

**अथायमूचे ज्ञातोऽसि राजद्विष्टं किमप्यधाः । तत्त्वां न्यग्राहयन्न्यायाभिग्रहोऽप्युग्रशासनः ॥ ५७ ॥**

अन्वयः—अथ अयं ऊचे, ज्ञातः असि, किं अपि राजद्विष्टं अधाः, तत् न्याय अभिग्रहः उग्र शासनः अपि त्वां न्यग्राहयत्.

अर्थः—त्यारे ते नित्यमित्रे कह्युं के, हुं तने ओळखुं छुं, तें कंइक पण राजविरुद्ध आचरण कर्युं छे, अने तेथी ते न्यायनिष्ठ उग्रशासन राजाए पण तने शिक्षा करी छे. ॥ ५७ ॥

**तन्मे राजविरुद्धेन न कार्यं किमपि त्वया । स्वकृतस्य प्रमाणेन सहस्वैकोऽपि निग्रहम् ॥ ५८ ॥**

अन्वय—तत् राजविरुद्धेन त्वया मे किं अपि कार्यं न, स्वकृतस्य प्रमाणेन एकः अपि निग्रहं सहस्व ? ॥५८॥

अर्थः—माटे राजविरुद्ध आचरण करनार एवा तारीसाथे मारे (रहेवानी) कंइ पण जरुर नथी. "पोतानुं कर्युं पोते भोगवे" ए न्यायथी तुं एकलोज आ सजा भोगव ? ॥ ५८ ॥

ऊचे सोऽथ सखे नित्यमकृत्यं त्वत्कृते कृतम् । सर्वं ह्युपकृतं तुभ्यं मुक्तान्युपकृतानि हा ॥ ५९ ॥

अन्वयः-अथ सः ऊचे, (हे) सखे ! त्वत्कृते नित्यं अकृत्यं कृतं, हि तुभ्यं सर्वं उपकृतं, हा ! उपकृतानि मुक्तानि ? ॥ ५९ ॥

अर्थः—त्यारे ते शुद्धबुद्धिए कह्युं के, हे मित्र ! तारेमाटे (में) हमेशां अकार्यो कर्यां, (अने) खरेखर तारापर सर्व उपकारो कर्या, अरेरे ! (ते) उपकारो तें (शुं) विसारी मेल्या ! ॥ ५९ ॥

अथातिविधुरो नित्यसुहृदभ्यधित क्रुधा । किमुद्घुष्यसि निर्लज्ज मत्कृते किं कृतं त्वया ॥ ६० ॥

अन्वयः-अथ अति विधुरः नित्य सुहृद् क्रुधा अभ्यधित, (रे) निर्लज्ज ! किं उद्घुष्यसि ? मत्कृते त्वया किं कृतं ? ॥ ६० ॥

अर्थः-त्यारे अति अकळायेला ते नित्यमित्रे क्रोधथी कह्युं के, अरे ! बेशरम ! शुं (तुं) लवान करी रह्यो छे ? मारे माटे तें शुं कर्युं छे?

यथा यथाहं त्वद्दत्तमाहरामि तथा तथा । प्रीतिस्तेऽभूत्ततः स्वस्मै त्वया सर्वं कृतं न मे ॥ ६१ ॥

अन्वयः-अहं यथा यथा त्वद् दत्तं आहरामि, तथा तथा ते प्रीतिः अभूत्, ततः त्वया स्वस्मै सर्वं कृतं, मे न. ॥ ६१ ॥

अर्थः—हुं जेम जेम तारुं आपेलुं खाउं छुं, तेम तेम तने आनंद थयो छे, माटे तें तारा पोताना माटेज सघळुं कर्युं छे, मारे माटे कंइज कर्युं नथी. ॥ ६१ ॥

मिथ्यावादिन्न मे कार्यं राजद्विष्टकृता त्वया । तन्मे पार्श्वं विमुञ्चेति धिक्स तेन गले धृतः ॥ ६२ ॥

अन्वयः-(रे) मिथ्यावादिन् ! राजद्विष्टकृता त्वया मे न कार्यं, तत् मे पार्श्वं विमुंच ? इति धिक् तेन सः गले धृतः. ॥६२॥

अर्थः-(माटे) अरे ! जूठाबोला लबाड ! राजविरुद्ध आचरण करनारा एवा तारीसाथे मारे कंइं लेवादेवा नथी, माटे मारुं पडखुं तजी दे ? एम कही अरेरे ! ते नित्यमित्रे ते (बिचाराने) गळचीमांथी पकड्यो. ॥ ६२ ॥

**इहान्तरे गृहान्तर्द्राक्पार्वणः सुहृदाययौ । उग्रशासनसंरुद्धं शुद्धबुद्धिं निशम्य सः ॥ ६३ ॥**

अन्वयः-इह अंतरे शुद्धबुद्धिं उग्र शासन संरुद्धं निशम्य सः पार्वणः सुहृद् द्राक् गृहांतः आययौ. ॥ ६३ ॥

अर्थः-एवामां (ते) शुद्धबुद्धिने उग्रशासने पकडेलो सांभळीने ते पर्वमित्र तुरत तेना घरनी अंदर आव्यो. ॥ ६३ ॥

**नित्यमित्रे विमुक्ताशो दीनं चक्षुर्जलाविलम् । किंकर्तव्यत्वमूढोऽसौ पर्वमित्रं प्रति न्यधात् ॥ ६४ ॥**

अन्वयः—नित्यमित्रे विमुक्त आशः, किं कर्तव्यत्व मूढः असौ पर्वमित्रंप्रति दीनं जल आविलं चक्षुः न्यधात्. ॥ ६४ ॥

अर्थः—नित्यमित्रमाटेनी आशा छोडीने, हवे शुं करवुं ? एवा विचारमां मूढ थयेलो ते शुद्धबुद्धि पर्वमित्र तरफ रंकनी पेठे आंसुओथी भरेली दृष्टि करवा लाग्यो. ॥ ६४ ॥

**जातं मित्र किमेतत्ते कथंचिच्छुट संप्रति । दत्वा मदीयं सर्वस्वं दुःखेऽस्मिन्मां नियुज्य वा ॥ ६५ ॥**

अन्वयः—(हे) मित्र ! एतत् ते किं जातं ? संप्रति मदीयं सर्वस्वं दत्वा, वा अस्मिन् दुःखे मां नियुज्य, कथंचित् छुट ?

अर्थः—( त्यारे ते पर्वमित्रे तेने कह्युं के ) हे मित्र ! आ तने शुं थइ गयुं ! हमणाज मारुं ( द्रव्यआदिक ) सर्व कंइं आपीने,

अथवा आ दुःखमां मने जोडीने तुं कोइ पण रीते छूटो था ? ॥ ६५ ॥

**एवं गलज्जलभरं कलयन्नयनद्वयम् । पर्वमित्रस्य गां श्रुत्वा दध्यौ शुद्धमतिस्तदा ॥ ६६ ॥**

अन्वयः–एवं पर्वमित्रस्य गां श्रुत्वा, गलत् जलभरं नयन द्वयं कलयन् तदा शुद्धमतिः दध्यौ. ॥ ६६ ॥

अर्थः–एरीतनी पर्वमित्रनी वाणी सांभळीने, तथा झरता आंसुओना समूहवाळी तेनी बन्ने आंखोने ध्यानमां लेतो ते शुद्धमति त्यारे बोल्यो के, ॥ ६६ ॥

**पोषितः प्लोषितस्वेन धिग्मया पुरुषाश्रयः । हहा कृतं कृतज्ञस्य न कदाचन किंचन ॥ ६७ ॥**

अन्वयः—धिक् ! प्लोषित स्वेन मया पुरुषाश्रयः पोषितः, हहा ! कृतज्ञस्य कदाचन किंचन न कृतं. ॥ ६७ ॥

अर्थः—(मने) धिक्कार छे ! के, पैसानुं पाणी करीने में (आ नित्यमित्रनामना) पुरुषाश्रयने पोष्यो ! (परंतु) अरेरे ! करेला उपकारने जाणनारा एवा (तमारामाटे) में कोइ दिवसे कंइं पण कर्युं नही. ॥ ६७ ॥

**इत्ययं चिन्तयन्नेव नित्यमित्रेण शुद्धधीः । गले बाढतरं धृत्वा द्रुतं दूरीकृतः स्वतः ॥ ६८ ॥**

अन्वयः—इति चिंतयन् एव अयं शुद्धधीः नित्य मित्रेण बाढतरं गले धृत्वा स्वतः द्रुतं दूरी कृतः. ॥ ६८ ॥

अर्थः–एम विचारतो हतो एवामांज ते शुद्धबुद्धिने ते नित्यमित्रे खूब जोरथी गरदन पकडीने पोतानी पासेथी तुरत दूर करी मेल्यो.

**मैनं नयध्वं स्थानेऽस्य मां नयध्वं रयादिति । पर्वमित्रे कृताक्रन्दे सोऽग्राहि नृपकिंकरैः ॥ ६९ ॥**

अन्वयः—एनं मा नयध्वं? अस्य स्थाने मां नयध्वं? इति रयात् पर्वमित्रे कृत आक्रंदे नृपकिंकरैः सः अग्राहि. ॥ ६९ ॥

अर्थः—(अरे!) आने न पकडी जाओ? तेनी जगोए मने पकडी जाओ? एम वेगथी पर्वमित्रे रडारोळ करते छते, राजाना नोकरोए ते शुद्धबुद्धिने पकडी लीधो. ॥ ६९ ॥

**तैस्तस्मिन्बलतः कृष्टे कष्टं पर्वसुहृद्यभूत्। चिरात्पुत्रीं विवाह्येवाशेत नित्यसुहृत्पुनः ॥ ७० ॥**

अन्वयः—तैः तस्मिन् बलतः कृष्टे पर्वसुहृदि कष्टं अभूत्, नित्य सुहृत् पुनः चिरात् पुत्रीं विवाह्य इव अशेत. ॥ ७० ॥

अर्थः—ते नोकरो तेने बलात्कारे खेंची जवाथी पर्वमित्रने तो कष्ट थयुं, परंतु नित्यमित्र तो जाणे घणे काळे पुत्रीनो विवाह करीने होय नही! तेम निरांते सूइ गयो. ॥ ७० ॥

**द्वादशार्कप्रभाचक्रकर्कशेन कृशानुना। दीप्तक्रोडस्य कूपस्य पार्श्वेऽसौ तैरनीयत ॥ ७१ ॥**

अन्वयः—द्वादश अर्क प्रभा चक्र कर्कशेन कृशानुना दीप्त क्रोडस्य कूपस्य पार्श्वे तैः असौ अनीयत. ॥ ७१ ॥

अर्थः—बार सूर्योनी कांतिना समूहसरखा आकरा अग्निवडे बळतो छे मध्यभाग जेनो, एवा कूवानी पासे तेओ तेने लाव्या.

**हहामुष्मिन्नहं क्षेप्योऽमीभिः क्रूरतराशयैः। तत्कथं नु भविष्यामीत्युत्कम्पोऽयमचिन्तयत् ॥ ७२ ॥**

अन्वयः—हहा! क्रूरतर आशयैः अमीभिः अहं अमुष्मिन् क्षेप्यः, तत् कथं नु भविष्यामि? इति उत्कंपः अयं अचिंतयत्.

अर्थः—अररे! अति निर्दय आशयोवाळा आ राजकिंकरो मने आ (बळता) कूवामां फेंकवाना छे, तो हवे मारुं शुं थशे? एम

कंपतोथको ते विचारवा लाग्यो के, ॥ ७२ ॥

**मयि विश्वहितेनोक्तं यदा दुःखे पतिष्यसि । त्वां सिद्धः सर्वगो लोकनाथः पास्यत्यसौ तदा ॥ ७३ ॥**

अन्वयः–मयि विश्व हितेन उक्तं, यदा दुःखे पतिष्यसि, तदा असौ सिद्धः सर्वगः लोक नाथः त्वां पास्यति. ॥ ७३ ॥

अर्थः–मने विश्वहिते कह्युं छे के, ज्यारे तुं दुःखमां पडीश, त्यारे आ सिद्ध अने सर्वज्ञ एवा लोकनाथ तारुं रक्षण करशे. ॥७३॥

**स मे संप्रति कालोऽयं करालोऽतिभयंकरः । तदसौ भवतु श्रीमाञ्शरणं करुणार्णवः ॥ ७४ ॥**

अन्वयः—संप्रति करालः अतिभयंकरः अयं मे सः कालः, तत् करुणा अर्णवः असौ श्रीमान् शरणं भवतु. ॥ ७४ ॥

अर्थः–माटे आ समये विक्राळ अने अतिभयंकर आ मारो ते समय (आवी लाग्यो छे), माटे करुणासागर एवा ते श्रीमान् लोकनाथनुं मने शरणुं होजो. ॥ ७४ ॥

**इत्यस्मिन्ध्यायति स्फायमानमञ्जुलतेजसः । हीरचीरपरीधानदृढबन्धकृशोदराः ॥ ७५ ॥**

**शुभ्रवज्रशिलागर्भमयदण्डोग्रपाणयः । अत्युदारहृदस्तारदृष्टयः स्फारमूर्तयः ॥ ७६ ॥**

**मुक्तादामदृढग्रन्थिग्रहावलितवेणयः । उत्तरस्या दिशः केचिदीयुः सारत्वरा नराः ॥७७॥ त्रिभिर्विशेषकम्**

अन्वयः—इति अस्मिन् ध्यायति, स्फायमान मंजुल तेजसः, हीर चीर परीधान दृढ बंध कृशोदराः, ॥ ७५ ॥ शुभ्र वज्र

शिला गर्भमय दंड उग्र पाणयः, अति उदार हृदः, तार दृष्टयः, स्फार मूर्तयः, ॥ ७६ ॥ मुक्ता दाम दृढ ग्रंथि ग्रह आवलित वेणयः, केचित् नराः सारत्वराः उत्तरस्याः दिशः ईयुः. ॥ ७७ ॥ त्रिभिर्विशेषकं ॥

अर्थः—एम ते लोकनाथनुं ध्यान धरतांथकां, विस्तार पामता मनोहर तेजवाळा, रेशमी वस्त्रना दुपट्टाना दृढ बंधनथी पातळी कटीतटवाळा, ॥ ७५ ॥ श्वेत वज्रमणिथी जडेला दंडोथी भयंकर हाथवाळा, अत्यंत निर्मल हृदयवाळा, विस्तीर्ण आंखोवाळा, मनोहर आकारवाळा, ॥ ७६ ॥ मुक्ताफलोनी माळाथी दृढ बांधेली गांठवाळी चोतरफ (मस्तकपर) गुंथेली वेणीओवाळा, केटलाक पुरुषो अति उतावळथी उत्तर दिशामांथी (ते शुद्धबुद्धिनी पासे) आव्या. ॥ ७७ ॥ त्रिभिर्विशेषकं ॥

**अमुं मुञ्चत रे योद्धुं मत्ता धत्तायुधानि वा। इति तेषां गिरा भूपकिंकरैः समरे स्थितम् ॥ ७८ ॥**

अन्वयः—रे मत्ताः ! अमुं मुंचत ? वा योध्धुं आयुधानि धत्त ? इति तेषां गिरा भूप किंकरैः समरे स्थितं. ॥ ७८ ॥

अर्थः—अरे ! उन्मत्त सुभटो ! आ शुद्धबुद्धिने छोडी द्यो ? नहितर युद्धमाटे हथीयार उपाडो ? एवीरीतनां तेओनां वचनथी ते उग्रशासन राजाना सुभटो लडाइमाटे तैयार थया. ॥ ७८ ॥

**ततस्तेषां च तेषां च दूरोद्धूतरजस्तमाः। प्रकम्पितजगच्चित्तः समरः समभून्महान् ॥७९॥**

अन्वयः—ततः तेषां च तेषां दूर उध्धूत रजः तमाः, प्रकंपित जगत् चित्तः महान् समरः समभूत्. ॥ ७९ ॥

अर्थः—पछी ते बन्ने पार्टीओना सुभटोवच्चे, दूरसुधि उडेली रजथी अंधकारवाळुं, तथा जगतना हृदयने कंपावनारुं महान्

युद्ध थवा लाग्युं. ॥ ७९ ॥

**तैर्महापुरुषै राजपुरुषाः परुषायुधाः । उच्चैःस्थितस्य लोकस्य पश्यतो जघ्निरेतराम् ॥ ८० ॥**

अन्वयः-तैः महापुरुषैः उच्चैः स्थितस्य लोकस्य पश्यतः परुषायुधाः राजपुरुषाः जघ्निरे तरां ॥ ८० ॥

अर्थः-ते महान पुरुषोए दूर बेठेला लोकोनी समक्ष तीक्ष्ण शस्त्रोवाळा ते उग्रशासनराजाना सुभटोने खूब मार्या. ॥ ८० ॥

**त्रासिताः पातिताः क्षुण्णा हारिता मारिताश्च ते । तैः सिद्धपूरुषैः पश्चाच्चक्रे विजयनर्तनम् ॥ ८१ ॥**

अन्वयः—तैः सिद्ध पुरुषैः ते त्रासिताः, पातिताः, क्षुण्णाः, हारिताः, च मारिताः, पश्चात् विजय नर्तनं चक्रे. ॥ ८१ ॥

अर्थः—ते सिद्ध पुरुषोए ते उग्रशासनना सुभटोने भयभीत कर्या, पाड्या, हंफाव्या, हराव्या, अने मार्या. तथा पछी तेओए ते विजयमाटे नृत्य कर्युं. ॥ ८१ ॥

**त्वत्प्रणामसुहृल्लोकनाथस्त्वामाह्वयेदिति । तं शुद्धबुद्धिं कूपान्तात्करेणादाय तेऽचलन् ॥ ८२ ॥**

अन्वयः-त्वत्प्रणाम सुहृद् लोकनाथः त्वां आह्वयेत्, इति तं शुद्धबुद्धिं कूप अंतात् करेण आदाय ते अचलन्. ॥ ८२ ॥

अर्थः—तारा प्रणाममित्र लोकनाथ तने बोलावे छे, एम कही ते शुद्धबुद्धिने ते कुवाना तळीयामांथी (पोताने) हाथे कहाडीने, साथे लेइ तेओ चालवा लाग्या. ॥ ८२ ॥

**स तैः समं व्रजन्नग्रे शिखरोल्लिखिताम्बरम् । अतुल्योल्लासिकल्याणमयसर्वाङ्गसुन्दरम् ॥ ८३ ॥**

अवचूलमिलन्मुक्तावलीवलयमञ्जुलम् । स्वविस्तारगुणैर्भूरिपूरिताशासमुच्चयम् ॥ ८४ ॥

अङ्गीकृतमहारङ्गतुरङ्गरथकुञ्जरम् । आलयं प्रीतिमानेकं सुविवेकं व्यलोकयत् ॥ ८५ ॥ त्रिभिर्विशेषकम्॥

अन्वयः—तैः समं अग्रे व्रजन् सः, शिखर उल्लिखित अंबरं, अतुल्य उल्लासि कल्याणमय सर्वांग सुंदरं, ॥ ८४ ॥ अवचूल मिलत् मुक्तावली वलय मंजुलं, स्व विस्तार गुणैः भूरि पूरित आशा समुच्चयं, ॥ ६१ ॥ अंगीकृत महारंग तुरंग रथ कुंजरं, एकं आलयं, सुविवेकं प्रीतिमान् व्यलोकयत्. ॥ ८५ ॥ त्रिभिर्विशेषकं ॥

अर्थः–तेओनी साथे आगळ चालतांथकां शिखरोवडे आकाशने कोतरता, अति चळकाटवाळा सुवर्णथी चोतरफ मढेल होवाथी सुंदर लागता, ॥ ८३ ॥ धजाओना अग्र भागमां लटकावेली मोतीओनी मालाओना वलयोथी शोभता, पोताना विस्तारना गुणोवडे घणो रोकेल छे दिशाओनो समूह जेणे एवा, ॥ ८४ ॥ स्वीकारायेल छे महान रंगवाळा घोडा, रथ तथा हाथी जेमां, एवा एक प्रासादने उत्तम विवेकपूर्वक खुशी थता ते शुद्धबुद्धिए जोयो. ॥ ८५ ॥ त्रिभिर्विशेषकं ॥

अथ क्वचित्कुरङ्गाक्षीशृङ्गारैर्नयनोत्सवे । क्वचिद्गीतसुधासिन्धुतरणोत्तरलश्रुतौ ॥ ८६ ॥

क्वचिद्बृहद्गृहारामसौरभ्योल्लासिनासिके । क्वचित्स्वाद्यशतालोकप्रचलद्रसनाञ्चले ॥ ८७ ॥

क्वचिद्विलाससरसीमरुत्पुलकिताङ्गके । तस्मिन्सद्मनि निश्छद्मप्रमोदः प्रविवेश सः ॥ ८८ ॥

अन्वयः—अथ क्वचित् कुरंगाक्षी शृंगारैः नयन उत्सवे, क्वचित् गीत सुधा सिंधु तरण उत्तरल श्रुतौ, ॥ ८६ ॥ क्वचित् बृहद् गृह आराम सौरभ्य उल्लासि नासिके, क्वचित् स्वाद्य शत आलोक प्रचलत् रसना अंचले, ॥ ८७ ॥ क्वचित् विलास सरसी मरुत् पुलकित अंगके, तस्मिन् सद्मनि निश्छद्म प्रमोदः सः प्रविवेश. ॥ ८८ ॥ त्रिभिर्विशेषकं ॥

अर्थः—पछी क्यांक स्त्रीओना शृंगारथी आंखोने आनंद आपनारा, क्यांक (गवातां) गायनरूपी अमृतसागरमां तरवामाटे अति उत्सुक थता श्रवणोवाळा, ॥ ८६ ॥ क्यांक घरपासे रहेला महान बगीचानी सुगंधिथी आनंद पामती नासिकावाळा, क्यांक खावालायक सेंकडोगमे पदार्थोना जोवाथी चपल थती जिह्वाना छेडावाळा, ॥ ८७ ॥ क्यांक मोज करवानी तलावडीपरथी आवता (ठंडा) वायुथी रोमांचित थतां शरीरवाळा, एवा ते मेहेलमां निर्मल आनंदवाळो ते शुद्धबुद्धि दाखल थयो. ॥८८॥ त्रिभिर्विशेषकं॥

अथारात्रिकसंकाशभ्रमन्मार्तण्डमण्डलम् । दूर्वाराजितरौप्यार्घपात्राभमृगलाञ्छनम् ॥ ८९ ॥

मङ्गलाक्षतसंभारनिभव्याकीर्णतारकम् । प्रणम्यमानं हृष्यद्भिः सुरासुरनराधिपैः ॥ ९० ॥

स्तूयमानं स्वधीशक्त्या सर्वदर्शनसूरिभिः । प्रसादविशदां दृष्टिं ददतं सेवकान्प्रति ॥ ९१ ॥

युते चतुर्भिश्चरणैर्भाग्येनापि सुदुर्लभैः । निविष्टं विष्टरे लोकस्पृहणीये महीयसि ॥ ९२ ॥

तस्य विश्वहितस्याङ्के कृतावष्टम्भसुस्थिरम् । प्रणाममित्रं दीप्ताङ्गं लोकनाथमलोकयत् ॥ ९३ ॥

अन्वयः–अथ आरात्रिक संकाश भ्रम मार्तंड मंडलं, दुर्वार अजित रौप्य अर्घपात्राभ मृग लांछनं, ॥ ८९ ॥ मंगल अक्षत संभार निभ व्याकीर्ण तारकं, हृष्यद्भिः सुर असुर नर अधिपैः प्रणम्यमानं, ॥ ९० ॥ सर्व दर्शन सूरिभिः स्व धी शक्त्या स्तूयमानं, सेवकान् प्रति प्रसादविशदां दृष्टिं ददतं, ॥ ९१॥ भाग्येन अपि सुदुर्लभैः चतुर्भिः चरणैः युते, लोक स्पृहणीये, महीयसि विष्टरे निविष्टं, ॥ ९२ ॥ तस्य विश्वहितस्य अंके कृत अवष्टंभ सुस्थिरं, दीप्त अंगं, लोक नाथं प्रणाम मित्रं अलोकयत् ॥ ९३ ॥

अर्थः—पछी आरतीसरखो भ्रम (करावतुं छे) सूर्यमंडल ज्यां, कबूल करवालायक उमदा रूपाना अर्घपात्रसरखो छे चंद्र ज्यां, ॥ ८९ ॥ मंगलीकमाटे तंडुलना समूहनीपेठे वीखरायेला छे ताराओ ज्यां, खुशी थता देव, दानव तथा मनुष्योना नायकोवडे वंदन कराता, ॥ ९० ॥ सर्व दर्शनोना आचार्योवडे पोतपोतानी बुद्धिनी शक्ति मुजब स्तुति कराता, सेवकोमते कृपाथी निर्मल दृष्टि फेंकता, ॥ ९१ ॥ भाग्यथी पण न मळी शके एवा चार पायाओथी युक्त थयेला, लोकोने गमे एवा महान सिंहासनपर बेठेला, ॥ ९२ ॥ ते विश्वहितना खोळामां अढेलीने स्थिर थइ बेठेला तथा देदीप्यमान शरीरवाळा, एवा "लोकनाथ" नामना प्रणाममित्रने ते शुद्धबुद्धिए जोया. ॥ ९३ ॥ पंचभिः कुलकं ॥

**तद्वीक्ष्य विस्मतोऽथायमध्यायद्धिग्ममौचितीम् । सर्वस्वं नित्यमित्राय दत्तं नो सत्कृतोऽप्ययम् ॥ ९४ ॥**

अन्वयः–अथ तद् वीक्ष्य विस्मितः अयं अध्यायत्, मम औचितीं धिक्, नित्यमित्राय सर्वस्वं दत्तं, अयं सत्कृतः अपि न.

अर्थः–पछी ते जोइने आश्चर्य पामेलो ते शुद्धबुद्धि विचारवा लाग्यो के, अरे! मारी योग्यताने धिक्कार छे! नित्यमित्रने (में मारुं)

सर्वस्व आपी दीधुं, अने आ प्रणाममित्रनो तो में सत्कार पण कर्यो नथी. ॥ ९४ ॥

**अभविष्यद्गतिः का मे कामेन चरतः क्षितौ । नतिमप्यकरिष्यं चेन्नास्य विश्वहितोक्तिभिः॥ ९५ ॥**

अन्वयः–चेत् विश्वहित उक्तिभिः अस्य नतिं अपि न अकरिष्यं, कामेन क्षितौ चरतः मे का गतिः अभविष्यत् ? ॥९५॥

अर्थः—जो विश्वहितना वचनोथी, आ लोकनाथने ( में ) नमस्कार पण न कर्यो होत तो, इच्छामुजब पृथ्वीपर भटकतो एवो जे हुं, तेनी शुं गति थात ? ॥ ९५ ॥

**इति चिन्तार्तचित्तोऽयं लोकनाथं ननाम च । तेनालिङ्ग्य धृतश्चाङ्के सप्रमोदवशंवदः ॥ ९६ ॥**

अन्वयः–इति चिंता आर्त चित्तः अयं लोकनाथं ननाम, तेन च आलिंग्य अंके धृतः, च सः प्रमोद वशंवदः ॥ ९६ ॥

अर्थः—ए रीतनी चिंताथी पीडित हृदयवाळो ते शुद्धबुद्धि लोकनाथने नम्यो, अने तेणे पण ( तेने ) भेटीने खोळामां लीधो, अने (तेथी) ते खुशी थयो. ॥ ९६ ॥

**किं मित्र विधुरोऽसीति पृष्टस्तेन महात्मना । शुद्धधीरभ्यदात्मन्युग्रशासनतो भयम् ॥ ९७ ॥**

अन्वयः–(हे) मित्र ! किं विधुरः असि ? इति तेन महात्मना पृष्टः शुद्धधीः आत्मनि उग्र शासनतः भयं अभ्यधात्. ॥ ९७॥

अर्थः–हे मित्र ! तुं केम गभरायेलो छे ? एम ते महात्माए पूछ्याथी ते शुद्धबुद्धिए पोताने ते उग्रशासन राजातरफथी भय थतो जाहेर कर्यो. ॥ ९७ ॥

**अथामुं स महात्माह किं भयं ते श्रितस्य माम् । क उग्रशासनस्तस्य दुःखं मूर्ध्नि मुखे रजः ॥ ९८ ॥**

अन्वयः–अथ सः महात्मा अमुं आह, मां श्रितस्य ते किं भयं ? कः उग्रशासनः? तस्य मूर्ध्नि दुःखं, मुखे रजः. ॥ ९८ ॥

अर्थः–पछी ते महात्मा लोकनाथे तेने कह्युं के, मारे शरणे आवेला एवा तने ( हवे ) शुं भय छे ? ते उग्रशासन कोणमात्र छे! तेने माथे दुःख पडशे, अने तेना मुखमां धूड पडशे. ॥ ९८ ॥

**न सच्चक्रे मया किंचिदयमित्यपि मा शुचः । सत्कृतिभ्यः समस्ताभ्यो महती सत्कृतिर्नतिः ॥ ९९ ॥**

अन्वयः–मया अयं किंचित् न सच्चक्रे, इति अपि मा शुचः ? समस्ताभ्यः सत्कृतिभ्यः नतिः सत्कृतिः महती. ॥ ९९ ॥

अर्थः–में आनो कंइ सत्कार कर्यो नथी, एवा विचारथी पण तारे दिलगिर थवुं नही, केमके सघळा सत्कारोथी नमस्काररूपी सत्कार महोटो छे. ॥ ९९ ॥

**सेवकानां ददल्लक्ष्मीं शौर्यादेः स्यान्नृपोऽनृणः । न तु तेषां प्रणामस्य कथमप्यनृणो भवेत् ॥ १०० ॥**

अन्वयः–सेवकानां शौर्य आदेः लक्ष्मीं ददत् नृपः अनृणः स्यात्, तु तेषां प्रणामस्य कथं अपि अनृणः न भवेत्. ॥ १०० ॥

अर्थः–सेवकोनी शूरवीरता आदिकना बदलामां धन आपवाथी राजा ( तेना ) करजथी मुक्त थाय छे, परंतु तेओना प्रणामना बदलामां (ते) कोइ पण रीते करजमुक्त थतो नथी. ॥ १०० ॥

**ततः कृतप्रणामस्य न भवामि तवानृणः । पदं त्रैलोक्यसाम्राज्यादप्युत्तरमनर्पयन् ॥ १ ॥**

अन्वयः-ततः कृत प्रणामस्य तव त्रैलोक्य साम्राज्यात् अपि उत्तरं पदं अनर्पयन् अनृणः न भवामि. ॥ १ ॥

अर्थः-माटे प्रणाम करनार एवा तने त्रणे लोकना साम्राज्यथी पण अधिक पदवी आप्याविना तारा करजथी (हुं) मुक्त थाउं नही.

**कृतिन्किंचिदृणस्यास्य ददे यावत्कलान्तरम् । तावत्तिष्ठैव मत्पार्श्वे मा कुतोऽपि भयं कृथाः ॥ २ ॥**

अन्वयः-(हे) कृतिन्! यावत् अस्य ऋणस्य किंचित् कलांतरं ददे, तावत् मत्पार्श्वे तिष्ठ एव, कुतः अपि भयं मा कृथाः ?

अर्थः—(माटे) हे सज्जन! ज्यांसुधी आ करजनुं (तने) कंइक व्याज आपुं, त्यांसुधी तुं मारीपासेज रहे, अने हवे तुं कोइनो पण भय न राख ? ॥ २ ॥

**इत्युक्त्वा स गृहस्याग्रभूमौ तेनाधिरोपितः । तस्थौ सुखस्पृहातुल्यकालपूर्णमनोरथः ॥ ३ ॥**

अन्वयः-इति उक्त्वा तेन गृहस्य अग्र भूमौ अधिरोपितः सः सुख स्पृहा तुल्य काल पूर्ण मनोरथः तस्थौ. ॥ ३ ॥

अर्थः-एम कहीने ते लोकबांधवे ते घरनी अग्रभूमिपर राखेलो ते शुद्धबुद्धि सुख मेळववानी इच्छाजेटला समयसुधी पोताना मनोरथ संपूर्ण करतोथको रह्यो. ॥ ३ ॥

**कैरप्यथ दिनैरेनं लोकनाथोऽभ्यधादिति । ज्ञातोऽसीह चिरात्तिष्ठन्नुग्रशासनकिंकरैः ॥ ४ ॥**

अन्वयः-अथ कैः अपि दिनैः लोकनाथः एनं इति अभ्यधात्, चिरात् इह तिष्ठन् उग्रशासन किंकरैः ज्ञातः असि. ॥ ४ ॥

अर्थः—पछी केटलाक दिवसो गयाबाद लोकनाथे तेने एम कह्युं के घणा काळथी तुं अहीं रहेलो छे, ए हकीकत उग्रशासनना

नोकरोना जाणवामां आवी छे. ॥ ४ ॥

**वञ्चयित्वैव मे सम्यग्दृष्टिं दुष्टैकचेष्टिताः । कदाचिच्छलयित्वामी त्वां ग्रहीष्यन्ति शत्रवः ॥ ५ ॥**

अन्वयः—दुष्ट एक चेष्टिताः अमी शत्रवः कदाचित् मे सम्यग्दृष्टिं वंचयित्वा त्वां ग्रहीष्यंति एव. ॥ ५ ॥

अर्थः—फक्त दुष्ट आचरणोवाळाज ते शत्रुओ कदाच लाग जोइ मारी नजर चूकावीने तने पकडी जशेज. ॥ ५ ॥

**तन्मुञ्चे मित्र कुत्रापि भवन्तं यत्र तत्र ते । संमुखालोकनेऽपि स्युर्न समर्थाः कथंचन ॥ ६ ॥**

अन्वयः—तत् (हे) मित्र ! भवंतं तत्र कुत्र अपि मुंचे, यत्र ते संमुख आलोकने अपि कथंचन समर्थाः न स्युः. ॥ ६ ॥

अर्थः-माटे हे मित्र ! तने त्यां क्यांक मूकुं, के ज्यां तारी सामे जोवाने पण कोइरीते (तेओ) समर्थ थइ शके नही. ॥ ६ ॥

**किं तु कष्टतरः पन्थाः सुदूरं तव गच्छताम् । क्षुत्तृष्णादिमहादुःखं सहमानैर्विलङ्घ्यते ॥ ७ ॥**

अन्वयः-किंतु तत्र सुदूरं गच्छतां पंथाः कष्टतरः, क्षुत् तृष्णा आदि महादुःखं सहमानैः विलंघ्यते. ॥ ७ ॥

अर्थः-परंतु त्यां घणे दूर जनाराओमाटेनो मार्ग वधारे कष्टवाळो छे, अने क्षुधा तथा तृषा आदिक अतिकष्ट सहन करनाराओ (ते मार्ग) ओळंगी शके छे, ॥ ७ ॥

**तद्विधेहि दृढं क्लेशसहने गहने मनः । मामन्वेहि कृतिन्देहि कण्ठपोठे पदं द्विषाम् ॥ ८ ॥**

अन्वयः–तत् (हे) कृतिन् ! गहने क्लेश सहने मनः दृढं विधेहि ? मां अन्वेहि ? द्विषां कंठपीठे पदं देहि ? ॥ ८ ॥

अर्थः–माटे हे चतुर ! आकरा क्लेशो सहन करवामां मनने मजबूत कर ? अने मारीपाछळ चाल्यो आव ? तथा शत्रुओनी गरदनपर पग मूक ? ॥ ८ ॥

**मनोहारिभिराहार्यैर्लोभयित्वा पदे पदे । पथि त्वामाह्वयिष्यन्ति स्नेहमारभ्य वैरिणः ॥ ९ ॥**

अन्वयः–पथि पदेपदे त्वां मनोहारिभिः आहार्यैः लोभयित्वा वैरिणः स्नेहं आरभ्य आह्वयिष्यंति. ॥ ९ ॥

अर्थः—(वळी) मार्गमां पगले पगले तने मनोहर भोजनोवडे ललचावीने ते शत्रुओ स्नेह देखाडीने बोलावशे, ॥ ९ ॥

**अङ्गेन वाचा चित्तेन संभावयसि तान्यदि । तच्छलाद् गृह्यमाणं तैस्त्वां रक्षिष्याम्यहं न हि ॥ १० ॥**

अन्वयः—अंगेन वाचा चित्तेन तान् यदि संभावयसि, तत् छलात् तैः गृह्यमाणं त्वां हि अहं न रक्षिष्यामि. ॥ १० ॥

अर्थः—शरीरथी, वचनथी के मनथी तेओनुं जो तुं आदरमान करीश, तो कपटथी तेओवडे पकडी जवाता एवा तने खरेखर हुं बचावीश नही. ॥ १० ॥

**इत्यमुं शिक्षयित्वैष लोकेशः प्रस्थितः पथि । तद्बद्धनिश्चयः शुद्धबुद्धिरन्वचलन्मुदा ॥ ११ ॥**

अन्वयः—इति अमुं शिक्षयित्वा एषः लोकेशः पथि प्रस्थितः, शुद्धबुद्धिः तद्बद्ध निश्चयः मुदा अन्वचलत्. ॥ ११ ॥

अर्थः—एरीते तेने शिखामण आपीने ते लोकनाथ मार्गे चालवा लाग्या, अने शुद्धबुद्धि ( पण ) तेमनापर विश्वास राखीने

हर्षथी तेनी पाछळपाछळ चालवा लाग्यो. ॥ ११ ॥

**तृषितो यत्र यत्रैष विषमेऽजनि वर्त्मनि । तत्र तत्र पयः शीतं पिबागच्छेति भाषिणीः ॥ १२ ॥**

**स्फारहाराद्यलंकाराः शृङ्गारस्येव देवताः । आलोकत पयःशालापालिका वरबालिकाः ॥ १३ ॥ युग्मम् ॥**

अन्वयः—विषमे वर्त्मनि यत्र यत्र एषः तृषितः अजनि, तत्र तत्र आगच्छ ? शीतं पयः पिब ? इति भाषिणीः, ॥ १२ ॥ स्फार हार आदि अलंकाराः, शृंगारस्य देवताः इव, पयःशाला पालिकाः वर बालिकाः आलोकत. ॥ १३ ॥ युग्मं ॥

अर्थः—ते विषम मार्गमां ज्यां ज्यां ते शुद्धबुद्धि तरस्यो थयो, त्यां त्यां, तुं आव ? आ शीतल जल पी ? एम बोलती, ॥ १२ ॥ तथा मनोहर हार आदिक आभूषणोवाळी, शृंगाररसनी देवीसरखी, जलशालानुं रक्षण करनारी मनोहर बालिकाओने ते जोवा लाग्यो. ॥ १३ ॥ युग्मं ॥

**पान्थसंघातपादाग्रपातरुग्णे रजोजुषि । तृणे च तत्र स्त्रैणे च सदृशास्तद्दृशोऽपतन् ॥ १४ ॥**

अन्वयः—पांथ संघात पाद अग्र पात रुग्णे तृणे च तत्र स्त्रैणे च तद् दृशः सदृशः अपतन्. ॥ १४ ॥

अर्थः—मुसाफरोना समूहना पगलांओ पडवाथी करमाइ गयेलां अने रजोटायेलां घासपर तथा ते स्त्रीपर ते शुद्धबुद्धिनी दृष्टि तुल्यपणे पडती हती. (अर्थात् घास अने स्त्रीने सरखी दृष्टिथी ते जोतो हतो.) ॥ १४ ॥

**क्षुत्क्षामकुक्षिर्यत्राभूत्तत्रालोकत सोऽग्रतः । सज्जाः षड्रसनिर्मज्जद्भोजना भाजनावलीः ॥ १५ ॥**

अन्वयः—यत्र सः क्षुत्क्षाम कुक्षिः अभूत्, तत्र अग्रतः षड् रस निर्मज्जत् भोजनाः सज्जाः भाजन आवलीः अलोकत. ॥ १५ ॥
अर्थः—(वळी) ज्यां ते क्षुधातुर थतो, त्यां आगळ षट् रसथी भरेलां भोजनोवाळी तैयार राखेली थाळोनी श्रेणिने ते जोतो हतो.

**अध्वन्यमण्डलीखेदप्रस्वेदजलपिच्छले । रजोभारेऽप्यसौ तत्राहारेऽपि समदर्श्यभूत् ॥ १६ ॥**

अन्वयः—अध्वन्य मंडली खेद प्रस्वेद जल पिच्छले रजः भारे अपि, तत्र आहारे अपि असौ समदर्शी अभूत्. ॥ १६ ॥
अर्थः—मुसाफरोनी श्रेणिओना थाकथी झरता पसीनाना जलथी कादवरूप थयेला धूडना समूहपर तथा ते भोजनप्रते पण ते तुल्य दृष्टिवाळो थयो. ॥ १६ ॥

**रविच्छविप्रतापेन जातो यत्रायमाकुलः । तत्र च्छायातरून्पुष्पगायद्भृङ्गानवैक्षत ॥ १७ ॥**

अन्वयः—रवि च्छवि प्रतापेन यत्र अयं आकुलः जातः, तत्र पुष्पगायत् भृंगान् छाया तरून् अवैक्षत. ॥ १७ ॥
अर्थः—सूर्यमंडलना तापथी ज्यां ते व्याकुल थतो, त्यां पुष्पोपर गुंजारव करता छे भमराओ ज्यां, एवां छायायुक्त वृक्षोने ते जोतो.

**दावाग्नौ च ज्वलज्ज्वाले विशाले च द्रुमोच्चये । तस्मिन्विस्मेरयामास दृशं समरसामसौ ॥ १८ ॥**

अन्वयः—च ज्वलत् ज्वाले दावाग्नौ, च तस्मिन् विशाले द्रुम उच्चये असौ सम रसां दृशं विस्मेरयामास. ॥ १८ ॥
अर्थः—परंतु बळती ज्वालावाळा दावानळमां, तथा ते विस्तीर्ण वृक्षोना समूहपर ते शुद्धबुद्धि तुल्य रसवाळी दृष्टि विस्तारवा लाग्यो, (अर्थात् ते बन्नेने ते तुल्य नजरथी जोतो हतो.) ॥ १८ ॥

**आकारयत्सु तद्रक्षामनुष्येषु मृदूक्तिभिः । नासौ प्रपञ्चयामास हेलयापि विलोचनम् ॥ १९ ॥**

अन्वयः—तद्रक्षा मनुष्येषु मृदु उक्तिभिः आकारयत्सु; असौ हेलया अपि विलोचनं न प्रपंचयामास. ॥ १९ ॥

अर्थः—तेओनुं रक्षण करनारा मनुष्यो कोमल वचनोवडे (तेने) बोलावतां छतां पण तेणे क्रीडामात्रथी ते सामे नजर करी नही.

**इति शुद्धमतिः सिद्धप्रतिज्ञः सत्वरं व्रजन् । अनन्यसदृशाकारं केवलैः स्फटिकैः कृतम् ॥ २० ॥**

**अदृष्टपूर्वं निर्भाग्यैः सभाग्यैश्च महद्गृहम् । पुरो निरूपयामास लोकनाथेन दर्शितम् ॥ २१ ॥ युग्मम् ॥**

अन्वयः—इति सिद्ध प्रतिज्ञः शुद्धमतिः सत्वरं व्रजन् अनन्य सदृश आकारं केवलैः स्फटिकैः कृतं, ॥ २० ॥ निर्भाग्यैः च सभाग्यैः अदृष्ट पूर्वं, लोकनाथेन दर्शितं महद्गृहं पुरः निरूपयामास. ॥ २१ ॥ युग्मं ॥

अर्थः—एरीते संपूर्णप्रतिज्ञावाळो ते शुद्धबुद्धि तुरत चालतो थको अनुपम आकृतिवाळा, केवल स्फटिक रत्नोथी बनावेला, ॥ २० ॥ निर्भाग्योए तथा सभाग्योए पण पूर्वे नही जोयेला, अने लोकनाथे देखाडेला महान मेहेलने जोवा लाग्यो. ॥ २१ ॥ युग्मं ॥

**तदालोकनसंजातपरमानन्दमग्नहृत् । स तृणं गणयामास चक्रिशक्रादिसंपदः ॥ २२ ॥**

अन्वयः—तत् आलोकन संजात परम आनंद मग्न हृत् सः चक्रि शक्र आदि संपदः तृणं गणयामास. ॥ २२ ॥

अर्थः—ते मेहेलने जोवाथी उत्पन्न थयेला परम आनंदमां मग्न थयेलुं छे हृदय जेनुं एवो ते शुद्धबुद्धि चक्री तथा इन्द्रनी समृ-

द्धिने (पण) तृणसमान गणवा लाग्यो. ॥ २२ ॥

**प्रविशाशु महासौधं तदेतत्तेऽकुतोभयम् । तमित्युक्त्वाचलल्लोकनाथो लोकेष्टसिद्धये ॥ २३ ॥**

अन्वयः–तत् एतत् महा सौधं आशु प्रविश ? ते अकुतः भयं, इति तं उक्त्वा लोकनाथः लोक इष्ट सिद्धये अचलत्. ॥ २३ ॥

अर्थः—ते आ महान् मेहेलमां (तुं) तुरत दाखल था? (हवे) तने कोइ तरफथी पण भय नथी, एम तेने कहीने ते लोकनाथ लोकोनो उपकार करवामाटे (त्यांथी) चालता थया. ॥ २३ ॥

**इति सर्वेष्टदं सर्वकष्टपिष्टकरं प्रभुम् । त्वमप्येनं महीनाथ लोकनाथं सुहृत्कुरु ॥ २४ ॥**

अन्वयः–(हे) महीनाथ ! इति सर्व इष्ट दं, सर्व कष्ट पिष्ट करं एनं लोकनाथं प्रभुं त्वं अपि सुहृत् कुरु ? २४ ॥

अर्थः—हे राजन् ! ए रीते सर्व वांछित पदार्थो आपनारा, तथा सर्व दुःखोनो नाश करनारा ते लोकनाथ नामना प्रभुने तुं पण मित्र कर ? ॥ २४ ॥

**मुञ्च दुःखं न दुःखेन भवन्तीष्टानि कुत्रचित् । आराध्नुहि रयाल्लोकनाथमिष्टार्थसिद्धये ॥ २५ ॥**

अन्वयः–दुःखं मुंच ? दुःखेन कुत्रचित् इष्टानि न भवंति, इष्ट अर्थ सिद्धये रयात् लोकनाथं आराध्नुहि ? ॥ २८ ॥

अर्थः—(तुं) संतापने छोडी दे ? (केमके) संताप करवाथी क्यांये वांछित कार्य सिद्ध थतुं नथी. वांछित पदार्थनी प्राप्तिमाटे (तुं) तुरत ते लोकनाथने आराध ? ॥ २५ ॥

अथापृच्छत्प्रियः पृथ्व्या लोकनाथः स कः प्रभो । कथं चाराध्यतेऽसौ तमाराध्नोमि प्रियासखः ॥२६॥

अन्वयः–अथ पृथ्व्याः प्रियः अपृच्छत्, (हे) प्रभो ! सः लोकनाथः कः ? च असौ कथं आराध्यते ? प्रियासखः तं आराध्नोमि.

अर्थः—पछी ते राजाए पूछयुं के, हे स्वामी ! ते लोकनाथ कोण छे ? अने तेने केम आराधी शकाय छे ? (ते कहो ? के जेथी) राणी सहित हुं तेने आराधुं. ॥ २६ ॥

इत्थमुक्ते नृपेणायं मुनिराचष्ट खेचरः । अन्तरङ्गधिया राजन्विचारय कथामिमाम् ॥ २७ ॥

अन्वयः–नृपेण इत्थं उक्ते अयं खेचरः मुनिः आचष्ट, (हे) राजन् ! अंतरंग धिया इमां कथां विचारय ? ॥ २७ ॥

अर्थः–राजाए एम कहेवाथी ते विद्याधर मुनि बोल्या के, हे राजन् ! अंतरंग बुद्धिथी तुं आ कथानो विचार कर ? ॥ २७ ॥

संसार एव दुःपारो दूरपाराभिधं पुरम् । उग्रः कर्मपरीणामो राजास्मिन्नुग्रशासनः ॥ २८ ॥

अन्वयः—संसारः एव दुःपारः, दूरपार अभिधं पुरं, अस्मिन् कर्म परीणामः उग्रः, उग्रशासनः राजा. ॥ २८ ॥

अर्थः–संसारज दुःपार होवाथी, ते दूरपारनामनुं नगर छे, अने तेमां कर्मोनो परिपाक भयंकर होवाथी, ते उग्रशासन नामे राजा छे.

शुद्धात्मा जीव एवैतन्मन्त्री शुद्धमतिर्मतः । नित्यमित्रं पुनस्तस्य यथोदितगुणं वपुः ॥ २९ ॥

अन्वयः–शुद्ध आत्मा जीवः एव तत् मंत्री शुद्धमतिः मतः, पुनः यथोदित गुणं वपुः तस्य नित्यमित्रं. ॥ २९ ॥

अर्थः–निर्मल आत्मस्वभाववाळो जीवज ते राजानो शुद्धमतिनामे मंत्री कहेलो छे, तथा पूर्वे कहेला गुणोवाळुं जे शरीर, ते तेनो

नित्यमित्र छे. ॥ २९ ॥

**जनो जनितसौजन्यस्तस्य पर्वसुहृन्मतः । गुरूपदेश एवास्य पूज्यो विश्वहिताभिधः ॥ ३० ॥**

अन्वयः—जनित सौजन्यः जनः तस्य पर्व सुहृद् मतः, गुरु उपदेशः एव अस्य विश्व हित अभिधः पूज्यः. ॥ ३० ॥

अर्थः—करेल छे सज्जनता जेणे एवा माणसने तेनो पर्वमित्र कहेलो छे, तथा गुरुनो उपदेशज तेनो विश्वहितनामे पूज्य उपदेशक छे.

**तच्छिक्षयामुना राजन् यः प्रणामसुहृत्कृतः । तं विद्धि लोकनाथाख्यं धर्ममेवाद्भुतं प्रभुम् ॥ ३१ ॥**

अन्वयः—(हे) राजन् ! तत् शिक्षया अमुना यः प्रणाम सुहृत् कृतः, तं धर्मं एव अद्भुतं लोकनाथ आख्यं प्रभुं विद्धि ?

अर्थः—हे राजन् ! ते विश्वहितना उपदेशथी तेणे जे प्रणाममित्र कर्यो, ते धर्मज छे, अने तेनेज अद्भुत एवा लोकनाथनामना प्रभु जाणवा. ॥ ३१ ॥

**दृष्टाः सुप्तोत्थितेनाग्रे तेन ये निष्ठुरा नराः । ते दुःकर्मगणा व्याधिमृत्युदुर्गतिहेतवः ॥ ३२ ॥**

अन्वयः—सुप्त उत्थितेन तेन अग्रे ये निष्ठुराः नराः दृष्टाः, ते व्याधि मृत्यु दुर्गति हेतवः दुःकर्म गणाः. ॥ ३२ ॥

अर्थः—(वळी) सूइ उठ्याबाद तेणे (पोतानी) पासे जे निर्दय पुरुषोने जोया, ते रोग, मृत्यु तथा दुर्गतिना कारणरूप दुष्कर्मोना समूहो जाणवा. ॥ ३२ ॥

**तै रुद्धो निःक्रियं वीक्ष्य जीवः शुद्धमतिर्वपुः । तस्मिन्नुपकृतं मेने भस्मनि क्षिप्तवत्तदा ॥ ३३ ॥**

अन्वयः—तैः रुद्धः शुद्धमतिः जीवः वपुः निःक्रियं वीक्ष्य, तदा तस्मिन् उपकृतं भस्मनि क्षिप्तवत् मेने. ॥ ३३ ॥

अर्थः—ते दुष्कर्मोथी रुंधायेलो ते शुद्धमति जीव (पोतानां) शरीरने क्रियारहित थयेलुं जोइने, ते वखते तेनापर करेला उपकारने राखमां फेंक्या समान मानवा लाग्यो. ॥ ३३ ॥

**कदाचित्किंचिदप्येष यद्ददौ स्वजने जने । तदा धावति दुःखार्ते तदमन्यत साध्विव ॥ ३४ ॥**

अन्वयः–कदाचित् किंचित् अपि एषः यत् स्वजने जने ददौ, तदा दुःखार्ते धावति, तत् साधु इव अमन्यत. ॥ ३४ ॥

अर्थः–(वळी) कोइ कोइ वखते कंइक पण ते शुद्धबुद्धि जे (पर्वमित्ररूप) स्वजनने आपतो, ते स्वजन ते समये पीडित थइ तेनां (औषधआदिक माटे) दोडधाम करी मेलतो, तेथी तेने आपेलुं ते सफल मानतो हतो. ॥ ३४ ॥

**कृष्टोऽङ्गेन गले धृत्वा क्रन्दति स्वजने शुचा । नीतो यत्रैष कूपोऽसौ नरको दुःखसाग्निकः ॥ ३५ ॥**

अन्वयः—अंगेन गले धृत्वा कृष्टः, स्वजने शुचा क्रंदति एषः नीतः, यत्र दुःख साग्निकः असौ नरकः कूपः. ॥ ३५ ॥

अर्थः–(एवामां) शरीरे तो गळची पकडीने (तेने) खेंची कहाड्यो, अने स्वजन तो शोकथी (त्यांज) रडतो रह्यो, अने ते जीवने (त्यां) घसडी जवामां आव्यो, के ज्यां दुःखरूपी अग्निथी भरेलो नरकरूपी कूवो हतो. ॥ ३५ ॥

**शरणं लोकनाथोऽस्तु ममेति गदितेऽमुना । ईयुर्ये पुरुषाः कर्मगणास्ते धर्मसाक्षिकाः ॥ ३६ ॥**

अन्वयः–लोकनाथः मम शरणं अस्तु, इति अमुना गदिते, ये पुरुषाः ईयुः, ते धर्म साक्षिकाः कर्मगणाः. ॥ ३६ ॥

अर्थः—लोकनाथ मने शरणरूप थाओ, एम तेणे कहेवाथी जे पुरुषो त्यां आवी पहोंच्या, तेओने (तेना) धर्मकार्योना साक्षीरूप थयेला (शुभ) कर्मोना समूहो (जाणवा.) ॥ ३६ ॥

**जितदुःकर्मभिर्निन्ये यत्र सत्कर्मभिस्त्वसौ । लीलावासः स धर्मस्य विवेकाख्योऽतिनिर्मलः ॥ ३७ ॥**

अन्वयः—तु जित दुःकर्मभिः सत्कर्मभिः असौ यत्र निन्ये, सः धर्मस्य अति निर्मलः विवेक आख्यः लीला आवासः. ॥३७॥

अर्थः—पछी ते दुष्कर्मोने जीतीने ते सत्कर्मो तेने ज्यां लेइ गया, तेने धर्मनो अत्यंत निर्मल विवेकनामनो क्रीडामेहेल (जाणवो.)

**दानशीलतपोभावसत्पादोपशमासनम् । गुरूपदेशावष्टम्भं तत्रासौ धर्ममैक्षत ॥ ३८ ॥**

अन्वयः—तत्र असौ दान शील तपः भाव सत्पाद उपशम आसनं गुरु उपदेश अवष्टंभं धर्मं ऐक्षत. ॥ ३८ ॥

अर्थः—त्यां ते शुद्धबुद्धिए दान, शील, तप तथा भावरूपी उत्तम चार पायावाळा उपशमनामना आसनवाळा, तथा गुरुना उपदेशने अवलंबीने रहेला धर्मने जोयो. ॥ ३८ ॥

**श्रीधर्मेण स्वसौधाग्रभूमौ कालं कमप्ययम् । देवेषु सम्यग्दृष्टित्वपदे सौख्येन लालितः ॥ ३९ ॥**

अन्वयः—श्रीधर्मेण स्व सौध अग्र भूमौ देवेषु सम्यग् दृष्टित्व पदे अयं कं अपि कालं सौख्येन लालितः ॥ ३९ ॥

अर्थः—पछी ते श्रीमान धर्मे पोताना मेहेलनी अग्र भूमिपर देवपणामां सम्यग्दृष्टिपणानी पदवीपर ते शुद्धबुद्धिने केटलाक काळसुधी सुखेथी आनंद कराव्यो. ॥ ३९ ॥

**ततः शिक्षास्थिरं मार्गे विषयैरप्रलोभितम् । धर्मस्तं मन्दिरे मुक्तौ मुक्तवानकुतोभये ॥ ४० ॥**

अन्वयः—ततः शिक्षा स्थिरं, मार्गे विषयैः अप्रलोभितं तं धर्मः अकुतः भये मुक्तौ मंदिरे मुक्तवान्. ॥ ४० ॥

अर्थः—पछी शिखामणोथी स्थिर चित्तवाळा, तथा मार्गमां विषयोवडे लालचमां नही पडेला एवा ते शुद्धबुद्धिने ते धर्मे तद्दन निर्भय एवा मोक्षमंदिरमां मूक्यो. ॥ ४० ॥

॥ इति मित्रत्रय चरित्रं समाप्तं ॥

**इति संसारस्थितिनिदर्शने मित्रत्रय चरित्रं समाप्तं. आ चरित्र श्रीवर्धमासूरिविरचित श्रीवासुपूज्यचरित्रनामना महाकाव्यमांथी स्वपरना श्रेय माटे ओधारीने तेना अन्वय तथा गुजरातीभाषांतर सहित पंडित श्रावक हीरालाल हंसराजे पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्युं छे. ॥**

॥ इति श्रीमित्रत्रयचरित्रं समाप्तं ॥